## 6.1.2 The institution practices decentralization and participative management

**संस्था सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च अनुसरति।**

## Answar :

सम्पूर्णानन्दकेन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रबन्धनव्यवस्था पूर्णशः सहभागिनी विकेन्द्रीकरणप्रक्रियाश्रिता चास्ति। सङ्घे शक्तिः कलौ युगे इति वचनमनुसृत्य प्रशासनव्यवस्था स्वीयानां मानवीयतत्त्वानां सहयोगं स्वीकृत्य एव कार्यं करोति। प्रबन्धनपरिश्रमयोः सुचारुरूपेण सङ्घटनाभावे प्रशासनकार्याणि निर्विघ्नं न सम्भवन्ति। अतः सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः अनुसरति । सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कृते जायमानाः लाभाः यथा –

1. संस्कृतेन सम्बद्धानां नूतनविचाराणां योजनानां च क्रियान्वयनावसरे विश्वविद्यालयस्य प्रबन्धनव्यवस्था आत्मानं सबलम् इति भावयति। यतोऽहि समेषां सङ्कायानां परिपूर्णः सहयोगः एव प्रबन्धनव्यवस्थायाः बलमस्ति।
2. लक्ष्यप्राप्तिप्रसङ्गे समयसीम्नि कार्यकारणावसरे समस्यायाः समाधानान्वेषणावसरे च प्रत्येकमपि सङ्कायः व्यक्तिगतभूमिकां दायित्वं च अवगम्य प्रतिपदं व्यक्तिगतं योगदानं प्रयच्छति।अनेन विश्वविद्यालयस्य धनसमयशक्तीनां सदुपयोगः जायते।
3. सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य समेषां कर्मचारिणां मनोबलं प्रतिपदं समभिवर्धतेतमाम् ।
4. सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च विश्वविद्यालयः विख्यातः व्याप्तः एकमेवाद्वितीयः संस्कृतविश्वविद्यालयः इति प्रकीर्त्यते।
5. विश्वविद्यालयः नूतनयोजनानां क्रियाकलापानां च अनुप्रयोगात् पूर्वं परामर्शशैलीम् आश्रित्य समेषां परामर्शान् स्वीकृत्य अन्तिमनिर्णयं स्वीकरोति । एवमेव अन्तिमनिर्णयप्रसङ्गेऽपि संयुक्तनिर्णयशैलीं समाश्रित्य प्रशास्ति। विभिन्नाः परिषदः , समितयः , प्रकोष्ठाः , मण्डलानि , सङ्काया विभागाश्च प्रशासनव्यस्थां सबलीकर्तुमेव संरचिताः सन्ति।

विश्वविद्यालयस्य विभिन्नाः समितयः संस्थायाः हितं विकासं च मनसि निधाय कार्यं कुर्वन्ति। तासु प्रमुखाः समितयः यथा –

1. **परीक्षासमितिः**

   परीक्षायाःतिध्यादिनिर्धारणं, परीक्षायाः व्यवस्थापनम्, केन्द्रस्थानस्य निर्धारणम्, प्रवेशपत्रप्रश्नपत्रादीनां वितरणम्, उत्तरपत्रिकाणां स्वीकरणम्, मूल्याङ्कनार्थं केन्द्रीयकार्यालयं प्रति प्रेषणम् इत्यादीनां निर्णयः अस्यां समितौ भवति।

**2. शोधसमितिः**

शोधसमितिः चितानां शोधार्थिनां शोधप्रस्तावं परिशीलयति । समीक्ष्य च मुख्यालयं प्रेषयति । छात्रवृत्तिप्रदाने संस्तौति । कार्यप्रगतेः निरीक्षणं करोति। शोधस्तरपरिरक्षणाय अपेक्षितव्यवस्थादिकं विधाय केन्द्रीयशोधसमितेः संसूचनानां अनुपालनं करोति।

3. **ग्रन्थालयसमितिः**

ग्रन्थालयसमितिः पुस्तकानां क्रयणसंरक्षणसंस्थापनवितरणादिषु कार्येषु प्रतिपदं मार्गदर्शनं करोति।

**4. वित्तसमितिः**

वित्तसमितिः वेतननित्यनैमित्तिकव्ययादीनां प्रबन्धनाय कार्यं करोति। वित्तीयसमितेः अनुमोदनेन सहयोगेन च क्रियाकलापान् विभागः संयोजयति।

**5. प्रवेशसमितिः**

प्रवेशसमितिः छात्राणां प्रवेशप्रक्रियायाः नामाङ्कनस्य परिचयपत्रप्रवेशिकादीनां च वितरणकार्यं निर्वहति। प्रवेशसमितेः अनुशासनेन विद्यार्थिनां प्रवेशः नियमानुसरं क्रियते ।

**6. अनुशासनसमितिः**

अनुशासनसमितिः अनुशासनभङ्गकरान् परिवेषान् वारयितुम् अनुशासनव्यवस्थां परिरक्षितुं च साहाय्यं करोति ।

7. **छात्रावाससमितिः**

छात्रावाससमितिः छात्राणां आवासभोजनव्यस्थादीनां व्यवस्थादिकं निर्वहति । छात्रावासे प्रवेशाय अपेक्षितान् नियमान् निर्धारयति ।

**8. शैक्षिकसमितिः**

शैक्षिकसमितिः शैक्षिकक्रियाकलापानां सञ्चालनाय प्रतिपदं शासनस्य साहाय्यम् आचरति।

**9. प्रकाशनसमितिः**

प्रकाशनसमितिः शोधपत्रिकायाः निमन्त्रणपत्रिकादीनां विद्द्भिः लिखितानां सम्पादितानां वा ग्रन्थानां च प्रकाशनाय उपकरोति ।

10. उत्पीडनावरोधकसमितिः

उत्पीडनावरोधकसमितिः विश्वविद्यालये उत्पीडनादीनाम् अनैतिकगतिविधीनां नियन्त्रणाय तत्र संलग्नान् दण्डनाय च संसुतिं प्रयच्छति।

11. **प्रतियोगितासमितिः**

प्रतियोगितासमितिः छात्राणां सर्वाङ्गीणविकासाय अपेक्षिताः विविधप्रतियोगिताः आयोजयति प्रेरयति च।

**12.क्रयणविक्रयणसमितिः**

क्रयणविक्रयणसमितिः विश्वविद्यालयाय अपेक्षितपदार्थानां क्रयणाय नष्टपदार्थानां विक्रयणाय च संस्तौति।

13. **मुद्रणसमितिः**

मुद्रणसमितिः विश्वविद्यालयस्य शैक्षिकशैक्षिकेतरकार्यक्रमैः सम्बद्धानां दत्तांशानां मुद्रणाय कार्यं करोति । प्रश्नपत्राणां, पञ्चाङ्गस्य, वार्षिकावकाशसूचीनां, ग्रन्थानां चान्येषां मुद्रणाय कार्यं करोति। चा एवं विशिष्टासु समितिषु विश्वविद्यालयस्य शिक्षकाः कर्मचारिणश्च शासनाय परिपूर्णं सहयोगं यच्छन्ति। आसां माध्यमेन सर्वेऽपि शैक्षिकप्राशासनिककार्याणि सुचारुरूपेण जायन्ते।

1. संस्थायाः उत्पादकतायां गुणवत्तायां च उत्तरोत्तरोत्तरं वृद्धिसम्पादनाय सहभागिप्रबन्धनव्यवस्था भृशं साहाय्यम् आचरति।
2. प्रजातन्त्रात्मकप्रणाल्याः उद्विकासे सहभागिप्रबन्धनव्यवस्थायाः मुख्यभूमिका अस्ति इत्यत्र विश्वविद्यालयस्य दृढविश्वासः विद्यते।
3. प्रबन्धनकौशलानां विकासे उपार्जने च सहभागितायाः प्रमुखं स्थानम् अस्ति इति विश्वविद्यालयः अभिप्रैति।

एवं विभिन्नस्तरेषु शासनस्य अधिकारस्य शक्तीनां च वितरणं विश्वविद्यालयस्य वर्तते। सूत्रे मणिगणाः इव प्रशासने विकेन्द्रीकरणप्रणाली शोभते।